# Prapannasarvasvam

# પ્રપન્નસર્વસ્વં

## Document Information

Text title : Prapannasarvasvam

File name : prapannasarvasvaM.itx

Category : raama, rAmAnanda

Location : doc_raama

Author : Haryanandacharya

Proofread by : Parashara Ranganathan

Latest update : January 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 28, 2024

*sanskritdocuments.org*

# પ્રપન્નસર્વસ્વં

સીતાનાથસમારમ્ભાં વ્યાસબોધાયનાન્વિતામ્ ।
અસ્મદાચાર્યપર્યન્તાં વન્દે ગુરુપરમ્પરામ્ ॥ ૧॥

શ્રિયાનન્દં ગુરું નત્વા કૃત્વા શ્રીરામવન્દનમ્ ।
પ્રપન્નસર્વસ્વં હિ કુર્વે સર્વાર્થસાધકમ્ ॥ ૨॥

પુત્રે ચ રક્ષકત્વસ્ય વિશ્વાસો નૈવ જાયતે ।
સ્વપિતુઃ પ્રતિકૂલે હિ રુદ્રાદૌ વ્યભિચારતઃ ॥ ૩॥

ભ્રાતૃણાં રક્ષકત્વેઽપિ સન્દેહો વિદ્યતે ખલુ ।
ભ્રાતરિ રાવણાદેશ્ચ રક્ષકત્વાવિલોકનાત્ ॥ ૪॥

પ્રહ્લાદજનકે યસ્માદ્ વ્યભિચારઃ પ્રદૃશ્યતે ।
પુત્રસ્ય જનકે તસ્માત્ સન્દિગ્ધં રક્ષણં મતમ્ ॥ ૫॥

જનન્યાં ભરતસ્યાથ દૃષ્ટં ન પુત્રરક્ષણમ્ ।
સન્દિગ્ધા પુત્રરક્ષા તત્ માતુશ્ચાપિ મતા બુધૈઃ ॥ ૬॥

દમયન્ત્યાદિરક્ષાયા નલાદૌ વ્યભિચારિતા ।
પત્નીરક્ષાપિ પત્યૌ તત્ સન્દિગ્ધત્વમુપૈતિ હિ ॥ ૭॥

રક્ષા ન નિશ્ચિતા તસ્માદ્ વિદ્યતે સૂર્યચન્દ્રયોઃ ।
ઈશસ્ય રાવણાદેશ્ચ તયોર્યદ્ વશવર્તિતા ॥ ૮॥

બ્રહ્મહત્યાભિભૂતત્વાચ્છપ્તત્વાદ્ ભીતિતોઽપિ ચ ।
યાતિ સન્દેહમિન્દ્રસ્ય રક્ષણં સુરરક્ષિણઃ ॥ ૯॥

સ્વપિતુશ્ચ શિરશ્છેદાદ્ રુદ્રસ્ય ક્રૂરકર્મણઃ ।
રક્ષણે ન હિ વિશ્વાસો જાયતેઽથ કથઞ્ચન ॥ ૧૦॥

રુદ્રેણ છિન્નશીર્ષત્વાદ્ દૈત્યાભ્યાં ક્લેશનાદથ ।
પરમં સંશયં યાતં બ્રહ્મણશ્ચાપિ રક્ષણમ્ ॥ ૧૧॥

તસ્કરૈરપહાર્યત્વાદ્ રક્ષણં ન મતં ધને ।
વ્યાધિભિશ્ચાભિનાશ્યત્વાદ્ બલં ચાપિ ન રક્ષકમ્ ॥ ૧૨॥

પ્રહ્લાદમુનિસીતાસુ સુગ્રીવે ચ વિભીષણે ।
અન્યત્રાપિ ચ દૃષ્ટં તે રક્ષણં રામ નિશ્ચતમ્ ॥ ૧૩॥

જ્ઞાનં નાસ્તિ ન કર્માસ્તિ ભક્તિશ્ચાપિ ન વિદ્યતે ।
ભાજનં ચાસ્મિ દોષાણાં પાહિ માં રઘુનન્દન ॥ ૧૪॥

ત્વાં વિના મે ગતિર્નાસ્તિ રામ ! દુઃખવિઘાતક ।
પ્રપદ્યાહં સ્થિતો નાથ યથેચ્છસિ તથા કુરુ ॥ ૧૫॥

શ્રિયાનન્દાર્યશિષ્યશ્રીહર્યાનન્દાર્યનિર્મિતમ્ ।
ઇદં પ્રપન્નસર્વસ્વં ભૂયાત્ સર્વસ્વદાયકમ્ ॥ ૧૬॥

ઇતિ પ્રતિપક્ષિભયઙ્કર જગદ્ગુરુ શ્રીહર્યાનન્દાચાર્ય
સિદ્ધશિરોમણિ પ્રણીતં પ્રપન્નસર્વસ્વં સમ્પૂર્ણમ્ ।

Proofread by Parashara Ranganathan

---

*Prapannasarvasvam*

pdf was typeset on January 28, 2024

Please send corrections to *sanskrit@cheerful.com*